This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 1992 विषय महाभारत
नाव. भीष्मस्तवराज (शान्तिपर्व) Mss
लेखक/लिपीकार —
पृष्ठ 24 काळ — पूर्ण/~~अपूर्ण~~

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥भीष्मस्तवराज॥श्री॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥श्रीगोपालकृष्णो॥
॥जनमेजयउवाच॥शरतल्पेशयानस्तुभ
॥रतानांपितामहः॥कथमुत्सृष्टवान्देहंकंच
॥योगमधारयत्॥१॥वैशंपायनउवाच॥
॥शृणुष्वावहितोराजन्शुचिर्भूत्वासमाहि

तः॥भीष्मस्यकुरुशार्दूलदेहोत्सर्गंमहात्मनः
निवृत्तमात्रेत्वयनेउत्तरेवैदिवाकरे॥समावेश
यदात्मानमात्मन्येवसमाहितः॥३॥विकीर्णां
शुरिवादित्योभीष्मःशरशतैश्चितः॥शुशुभे
परमयालक्ष्म्यावृतोब्राह्मणसत्तमैः॥४॥व्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२॥ सेनवेदविदुषानारदेनसुरर्षिणा॥ देवस्थानेन
वात्स्येनतथाइयेनसुमंतुना॥५॥ तथाजैमिनि
नाचैवपैलेनचमहात्मना॥ शांडिल्यदेवलाभ्यां
चमैत्रेयेणचधीमता॥६॥ असितेनवशिष्ठेन
कौशिकेनमहात्मना॥ हारीतलोमशाभ्यांच

तथात्रेयेणधीमता॥७॥ बृहस्पतिश्चशुक्रश्च
च्यवनश्चमहामुनिः॥ सनत्कुमारकपिलौवा
ल्मीकिस्तुंबरुः कुरुः॥८॥ मौद्गल्योभार्गवोरा
मस्तृणबिंदुर्महामुनिः॥ पिप्पलादश्चवायु
श्चसंवर्त्तः पुलहः क्रतुः॥९॥ काश्यपश्च पुलस्त्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चक्रतुर्दक्षः पराशरः ॥ मरीचिरंगिराः काश्
श्यो गौतमो गालवो मुनिः ॥ १० ॥ धौम्यो विभां
डो मांडव्यो धौम्रः कृष्णान्नभौतिकः ॥ उलू
कः परमो विप्रो मार्कंडेयो महामुनिः ॥ ११ ॥
भास्करिः पूरणः कृष्णः सूतः परमधार्मिकः

एतैश्चान्यैर्मुनिगणैर्महाभागैर्महात्मभिः
श्रद्धादमपुरस्कारैर्वृतश्चंद्र इवग्रहैः ॥ भी
ष्मस्तु पुरुषव्याघ्रः कर्मणा मनसा गिरा ॥
॥ १२ ॥ शरतल्पगतः कृष्णं प्रदध्यौ प्रांजलिः
शुचिः ॥ स्वरेणहृष्टपुष्टेन तुष्टाव मधुसूद

नं॥१४॥योगेश्वरंपद्मनाभंविष्णुंजिष्णुंज
गत्पतिं॥कृतांजलिः शुचिर्भूत्वावाग्विदां
प्रवरःप्रभुः॥१५॥भीष्मःपरमधर्मात्मावासु
देवमथास्तुवत्॥भीष्मउवाच॥आरिराध
यिषुःकृष्णंवाचंजिगदिषामियां॥१६॥तया

व्यससमासिन्याप्रीयतांपुरुषोत्तमः॥
शुचिंशुचिपदंहंसंतत्पदंपरमेष्ठिनं॥१७॥
मुक्त्वासर्वात्मनात्मानंतंप्रपद्येप्रजा
पतिं॥अनाद्यंतंपरंब्रह्मनदेवानर्षयोवि
दुः॥१८॥एकोयंवेदभगवान्धातानारायणो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरिः॥नारायणादृषिगणास्तथासिद्धम
होरगाः॥देवादेवर्षयश्चैवयंविदुःपरमव्य
यं॥देवदानवगंधर्वायक्षराक्षसपन्नगाः॥
॥२१॥यंनजानंतिकोह्येषकुतोवाभगवानि
ति॥यस्मिन्विश्वानिभूतानितिष्ठंतिचवि

शंतिच॥गुणभूतानिभूतेशेसूत्रेमणिगणा
इव॥यस्मिन्नित्येततेतंतौदृढेस्रगिवतिष्ठ
ति॥२२॥सदसद्ग्रथितंविश्वंविश्वांगंविश्वक
र्मणि॥हरिंसहस्रशिरसंसहस्रचरणेक्ष
णं॥२३॥सहस्रबाहुमुकुटंसहस्रवदनो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥

ज्वलं॥माहुर्नारायणंदेवंयंविश्वस्यपराय
णं॥२४॥अणीयसामणीयांसंस्थविष्ठंचस्थ
वीयसां॥गरीयसांगरिष्ठंचश्रेष्ठंचश्रेयसा
मपि॥२५॥यंवाकेष्वनुवाकेषुनिषत्सुपनिष
त्सुच॥गृणंतिसत्यकर्माणंसत्यंसत्येषुसा

मसु॥२६॥चतुर्भिश्चतुरात्मानंसत्वस्थंसा
त्वतांपतिं॥यंदिव्यैर्देवमर्चंतिगुह्यैःपरम
नामभिः॥२७॥यस्मिन्नित्यंतपस्तप्तंयदंगे
ष्वनुतिष्ठति॥सर्वात्मासर्ववित्सर्वसर्वगः
सर्वभावनः॥२८॥यंदेवंदेवकीदेवीवसुदेवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्री॥ ॥स्त॥

दजीजनत्॥भौमस्यब्रह्मणोगुह्येदीप्तम
ग्निमिवारणिः॥२९॥यमनन्योव्यपेताग्नी
रात्मानंवीतकल्मषं॥दृष्ट्वानंत्यायगोविंदं
पश्यत्यात्मानमात्मनि॥३०॥अतिवाय्विं
द्रकर्माणमतिसूर्याग्नितेजसं॥अतिबुद्धीं

द्रियात्मानंतंप्रपद्येप्रजापतिं॥३१॥पुराणे
पुरुषंप्रोक्तंब्रह्मप्रोक्तंयुगादिषु॥क्षयेसंक
र्षणंप्रोक्तंतमुपास्यमुपास्महे॥३२॥यमे
कंबहुधात्मानंप्रादुर्भूतमधोक्षजं॥नान्य
भक्ताःक्रियावंतोयजंतेसर्वकामदं॥३३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यमाहुर्जगतःकोशंयस्मिन्सन्निहिताःप्र
जाः॥यस्मिल्लोकाःस्फुरंतीमेजलेशकुन
योयथा॥२४॥ऋतमेकाक्षरंब्रह्मयत्तत्सद
सतःपरं॥अनादिमध्यमपर्यंतंनदेवानर्ष
योविदुः॥२५॥यंसुरासुरगंधर्वाःससिद्धर्षि

महोरगाः॥प्रयतानित्यमर्चंतिपरमंदुःख
भेषजं॥२६॥अनादिनिधनंदेवमात्मयोनिंस
नातनं॥अप्रतर्क्यमविज्ञेयंहरिंनारायणं
प्रभुं॥२७॥यंवैविश्वस्यकर्तारंजगतस्तस्थु
षांपतिं॥वदंतिजगतोध्यक्षमक्षरंपरमंपदं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिरण्यवर्णंयंगर्भमदितेर्दैत्यनाशनं॥ एकंद्वा
दशाधाजज्ञेतस्मैसूर्यात्मनेनमः॥३९॥ शुक्ले
देवान्पितॄन्कृष्णेतर्पयत्यमृतेनयः॥ यश्च
राजाद्विजातीनांतस्मैसोमा॰॥४०॥ महतस्त
मसःपारेपुरुषंत्यतितेजसं॥ यंज्ञात्वामृत्युम

त्येतितस्मैयज्ञात्मनेनमः॥४१॥ यंबृहंतंबृह
त्युक्थेयमग्नौयंमहाध्वरे॥ यंविप्रसंघागायं
तितस्मैवेदात्म॰॥४२॥ ऋग्यजुःसामधामा
नंदशार्द्धहविराकृतिं॥ यंसप्ततंतुंतन्वंति
तस्मैयज्ञात्मने॰॥४३॥ चतुर्भिश्चचतुर्भिश्चद्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्यांपंचभिरेवच॥हूयतेचपुनर्द्वाभ्यांतस्मैय

ज्ञात्मनेनमः॥४४॥यः सुपर्णोयजुर्नामछंदो

गात्रस्त्रिवृच्छिराः॥रथंतरं बृहत्सामतस्मैस्तो

त्रात्मनेनमः॥४५॥यः सहस्रमहेसत्रेजज्ञेवि

श्वसृजन्मृषिः॥हिरण्यवर्णःशकुनिंतस्मैता

र्क्ष्यात्मने॥४६॥यदंगसंधिपर्वाणंस्वरव्यंजन

भूषणं॥यमाहुरक्षरंनित्यंतस्मैवागात्मने॥४७॥

यज्ञांगोयोवराहोवैभूत्वागामुज्जहारह॥लो

कत्रयहितार्थायतस्मैवीर्यात्मने॥४८॥यःशे

तेयोगमास्थायपर्यंकेनागभूषिते॥फणासह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वरचितेतस्मैनिद्रात्मनेनमः ॥ ४९ ॥ यश्चिनोति
सतांसेतुमृतेनामृतयोगिना ॥ धर्मार्थव्यवहारां
गैस्तस्मैसत्यात्मनेनमः ॥ ५० ॥ यंपृथग्धर्म
चरणाः पृथग्धर्मफलैषिणः ॥ पृथक्धर्मैः
समर्चितितस्मैधर्मात्मनेनमः ॥ ५१ ॥ यतः सर्वे

प्रसूयंतेत्द्यनंगात्मंगदेहिनः ॥ उन्मादः सर्व
भूतानांतस्मैकामात्मने ॥ ५२ ॥ यत्तद्व्यक्तस्थ
मव्यक्तंविचिन्वंतिमहर्षयः ॥ क्षेत्रेक्षेत्रज्ञमा
सीनंतस्मैक्षेत्रात्मनेनमः ॥ ५३ ॥ यंत्रिधात्मा
नमात्मस्थंवृतंषोडशभिर्गुणैः ॥ प्राकुर्विषय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोप्तारं तस्मै सांख्यात्मनेनमः॥५४॥यंविनि
द्राजिताः श्वासाः शांतांदांतां जितेंद्रियाः॥ज्यो
तिः पश्यंतियुंजानास्तस्मैयोगात्मने॥५५॥अ
पुण्यपुण्योपरमेयंपुनर्भवनिर्भयाः॥शांता
सन्यासिनोयांतितस्मैमोक्षात्मनेनमः॥५६

योसौयुगसहस्रांतेप्रदीप्तार्चिर्विभावसुः
संभक्षयतिभूतानितस्मैघोरात्मने॥५७॥
अजस्यनाभ्यांसंभूतंयस्मिन्विश्वंप्रतिष्ठि
तं॥पुष्करेपुष्कराक्षस्यतस्मैपद्मात्मनेनमः
सहस्रशिरसेचैववपुषायामितात्मने॥च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लुः समुद्रपर्यायियोगनिद्रात्मनेनमः ॥ यस्य
केन्द्रोषुजीमूतानद्यः सर्वांगसंधिषु ॥ कुक्षौस
मुद्राश्चत्वारस्तस्मैतोयात्मनेनमः ॥ ६० ॥ य
स्मात्सर्वाः प्रसूयंते सर्वप्रलयविक्रियाः ॥ य
स्मिंश्चैव प्रलीयंते तस्मैहेत्वात्मनेनमः ॥ ६१ ॥

योनिषण्णोभवेद्रात्रौदिवाभवतिविष्ठितः ॥
इष्टानिष्टस्यचद्रष्टातस्मैदंष्ट्रात्मनेनमः ॥ ६२ ॥
अकुंठंसर्वकार्येषुधर्मकार्यार्थमुद्यतं ॥ वैकुं
ठस्यहितद्रूपंतस्मैकार्यात्मनेनमः ॥ ६३ ॥ त्रिः
सप्तकृत्वायत्क्षत्रंधर्मव्युत्क्रांतगौरवं ॥ क्रुद्धो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निजघ्नेसमरेतस्मै क्रुत्धात्मने ॥६४॥ विभज्य
पंचधात्मानंवायुभूतःशरीरगः॥ यःश्वेष्टय
तिभूतानां तस्मैवाय्वात्मनेनमः॥६५॥ युगेवा
वर्त्ततेयोगैर्दिनर्त्वयनहायनैः॥ सर्गप्रलल
योःकर्त्तातस्मैकालात्मने॥६६॥ ब्रह्मवक्त्रंभु

जौक्षत्रंकृत्स्नमूरूदरंविशः॥ पादौयस्याश्रि
ताःशूद्रास्तस्मैवर्णात्मने॥६७॥ यस्याग्निरा
स्यंद्यौर्मूर्द्धारवंनाभिश्चरणौक्षितिः॥ सूर्यःश्च
क्षुर्दिशःश्रोत्रेतस्मैलोकात्मनेनमः॥६८॥ परः
कालात्परोयज्ञात्परात्परतरोहियः॥ अनादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रादिर्विश्वस्यतस्मैविश्वात्मने०॥ विषयेवर्त्तमा
नानांयंतंवैशेषिकैर्गुणैः॥ प्राकृर्विषयगोप्ता
रंतस्मैगोप्त्रात्मनेनमः॥७०॥ अन्नपानेंधनम
योरसप्राणविवर्द्धनः॥ योधारयतिभूतानित
स्मैप्राणात्मनेनमः॥७१॥ प्राणानांधारणार्थाय

योन्नंभुंक्तेचतुर्विधं॥ अंतर्भूतःपचत्यग्निस्त
स्मैपाकात्मने०॥७२॥ पिंगेक्षणसटंयस्यरूपंदं
ष्ट्रानखायुधं॥ दानवेंद्रांतकरणस्तस्मैदृप्तात्म
ने०॥७३॥ रसातलगतःश्रीमाननंतोभगवान्
विभुः॥ जगद्धारयतेकृत्स्नंतस्मैवीर्यात्मने०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योमोहयतिभूतानिस्नेहपाशानुबंधनैः स
र्गस्यरक्षणार्थायतस्मैमोहात्मने ॥ ७५ ॥ स्थूल
लेतलमध्यस्थो हत्वातुमधुकैटभौ ॥ उद्धृता
येनवैवेदातस्मैमत्स्यात्मनेनमः ॥ ७६ ॥ ससा
गरनगांबिभ्रत्ससद्वीपावसुंधरां ॥ योधारय

तिपृष्ठेनतस्मैकूर्मात्मने ॥ ७७ ॥ एकार्णवेम
हीमग्नांवराहंरूपमास्थितः ॥ उद्धारमहींयो
सौतस्मैक्रोडात्मने ॥ ७८ ॥ नारसिंहवपुःकृ
त्वा यस्त्रैलोक्यभयंकरं हिरण्यकशिपुंजघ्नेत
स्मैसिंहात्मने ॥ ७९ ॥ वामनंरूपमास्थायब

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लिंसंयम्यमायया॥इमेकांलास्त्रयोलोकास्त
स्मैकांलात्मनेनमः॥९०॥जमदग्निसुताभूत्वा
रामःपरसुधृक्प्रभुः॥सहस्रार्जुनहंतायत
स्मैउग्रात्मनेनमः॥९१॥रामोदाशरथिर्भूत्वापौ
लस्त्यकुलनंदन॥जघानरावणंसंख्येतस्मैक्ष

त्रात्मनेनमः॥९३॥वसुदेवसुतःश्रीमान्वासु
देवोजगत्पतिः॥जहारवसुधाभारंतस्मैकृष्णा
त्मनेनमः॥९४॥बुद्धरूपंसमास्थायसर्वधर्मप
रायणाः॥मोहयन्सर्वभूतानितस्मैबुद्धात्मने
नमः॥९५॥हनिष्यतिकलेरंतेम्लेछांस्तुरगवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्नः॥अनादिरादिर्विश्वस्यतस्मैविश्वात्म॰॥
आत्मज्ञानमिदंज्ञानंज्ञात्वापंचस्ववस्थितं॥यं
ज्ञानेनाधिगच्छंतितस्मैज्ञानात्मने॰॥८६॥अप्र
मेयशरीरायसर्वतोबुद्धिचक्षुषे॥अपारपरि
मेयायतस्मैदिव्यात्मनेन॰॥८७॥जटिनेदंडि

नेनित्यंलंबोदरशरीरिणे॥कमंडलुनिषंगाय
तस्मैब्रह्मात्मने॰॥८८॥शूलिनेत्रिदशेशायत्र्यं
बकायमहात्मने॥भस्मदिग्धोर्द्ध्वलिंगायतस्मै
रुद्रात्मने॰॥८९॥चंद्रार्धकृतशीर्षायव्यालय
ज्ञोपवीतिने॥पिनाकशूलहस्तायतस्मैउग्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्मनेनमः॥१०॥ पंचभूतात्मभूताय भूतादिनि
धनायच॥ अक्रोधद्रोहमोहायतस्मैशांता
त्मने॰॥११॥ यस्मिन्सर्वंयतः सर्वंयः सर्वंसर्वत
श्चयः॥ यश्चसर्वमयोदेवस्तस्मैसर्वात्मने॰॥१२॥
विश्वकर्मन्नमस्तेस्तुविश्वात्मन्विश्वसंभव॥

अपवर्गस्थभूतानांपंचानांपरतस्थितः॥ न
मस्तेत्रिषुलोकेषुनमस्तेस्तुपतत्रिषु॥ नम
स्तेदिक्षुसर्वासुत्वंहिसर्वमयोनिधिः॥१४॥ न
मस्तेभगवन्विष्णोल्लोकानांप्रभवाव्यय॥
त्वंहिकर्ताहृषीकेशसंहर्ताचापराजितः॥१५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनपश्यामितेभावान्दिव्यान्दिशिदिक्षुकर्म
सु॥ तत्त्वंपश्यामितत्त्वेनयत्तेरूपंसनातनं॥
दिवंतेशिरसाव्याप्तंपद्भ्यांदेवीवसुंधरा॥ वि
क्रमेणत्रयोलोकाः पुरुषोसिसनातन॥ ९७
दिशोभुजारविश्चक्षुर्वीर्यंशुक्रप्रजापती

सप्तमार्गानिरुद्धास्तेवायोरमिततेजसः॥ ९८॥
अतसीपुष्पसंकाशंपीतकौशेयवाससं॥
येनमस्यंतिगोविंदंनतेषांविद्यतेभयं॥ ९९॥
नमोनरकसंत्रासरक्षामंडलकारिणे॥ सं
सारनिम्नगावर्ततरकाष्ठायविष्णवे॥ १००॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥भी०॥ ॥स्त०॥

नमोब्रह्मण्यदेवायगोब्राह्मणहितायच
जगद्धितायकृष्णायगोविंदायनमोनमः॥१॥
प्राणकांतारपाथेयंसंसारच्छेदभेषजं॥दुः
खशोकपरित्राणंहरिरित्यक्षरद्वयं॥१०२॥
यथाविष्णुमयंसत्यंयथाविष्णुमयंजगत्

॥२१॥

यथाविष्णुमयंसर्वंपाप्मामेनश्यतांतथा
त्वांप्रपन्नायभक्तायगतिमिष्टांजिगीषवे
यच्छ्रेयःपुंडरीकाक्षतध्यायस्वसुरेश्वरः॥४
इतिविद्यातपोयोनिरयोनिर्विष्णुरीडितः
वाग्यज्ञेनार्चितोदेवःप्रीयतांमेजनार्दन॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नारायणपरंब्रह्मनारायणपरंतपः॥नारा
यणपरंचेदंसर्वंनारायणात्मकं॥ वैशंपा
य नउवाच॥एतावदुक्त्वावचनंभीष्मस्तद्ग
तमानसः॥नमइत्येवकृष्णायप्रणामक
रोत्तदा॥७॥अभिगम्यतुयोगेनभक्तिंभी

ष्मस्यमाधवः॥त्रैलोक्यदर्शनंज्ञानंदिव्यं
दत्वाययौहरिः॥८॥तस्मिन्नुपरतेशब्देत
तस्तेब्रह्मवादिनः॥भीष्मंवाग्भिर्बाष्पकंठ
स्तमानर्चुर्महामतिं॥९॥तेस्तुवंतश्चविप्रा
ग्र्याः केशवंपुरुषोत्तमं॥भीष्मंचशनैकैःस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैःप्रवाद्यांसुःपुनःपुनः॥१०॥ विदित्वाभक्तियो
गंतुभीष्मस्यपुरुषोत्तमः॥ सहसोत्थायसंहृ
ष्टोयानमेवान्वपद्यत॥११॥ केशवःसात्यकि
श्चैवरथेनैकेनजग्मतुः॥ अपरेणमहात्मा
नौयुधिष्ठिरधनंजयौ॥१२॥ भीमसेनोयमौ

चोभौरथमेकंसमास्थितौ॥ कृपोयुयुत्सुःसू
तश्चसंजयश्चापरंरथं॥१३॥ तेरथैर्नगराका
रैःप्रयाताःस्थिरबुद्धयः॥ नेमिघोषेणमह
ताकंपयंतोवसुंधरां॥१४॥ ततोगिरःपुरुष
वरस्तवान्विताद्विजेरिताःपथिसुमनासशु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रुवे॥ कृतांजलिंप्रणतमयापरंजनंसकेशि
हामुदितमनाभ्यनंदत॥१२४॥ ६ शांतिप
र्वणिमोक्षधर्मेभीष्मस्तवराजसमाप्तः॥छ
॰ श्रीराधाकृष्णार्पणमस्तु॥ श्रीरामजयराम
॥छ ॥छ ॥छ ॥छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।श्री।

॥स्त॰॥

।२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=20.07.19 12:17
,TRANSFERRED=2019/07/20 at 12:27:08
,PAGES=28
,TYPE=STD
,NAME=S0001045
,Book Name=M-1992-BHISHMSTARVRAJ SHANTIPURV MSS
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection